ॐ वेदान्तदर्शने श्रीरामानन्ददर्शनम् ॐ

ले० पण्डितराज पं० श्रीरघुनाथशर्मा
मु. पो. छाता, जिला बलिया
(भारतसर्वकारपुरस्कृतोवाराणसेयसम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्यभूतपूर्वोवेदान्तविभागाध्यक्षः)

पदमिह कारुणिकं शरणं राजोऽप्यहि सहोदर आपमहत्पदम् ।
तमहमाशु हरिं परमाश्रये जनकजाङ्कमनन्तसुखाकृतिम् ॥१॥

श्रीरामानन्दसम्प्रदाये एकोनचत्वारिंशत्तम आचार्यः श्रीरघुवराचार्यो बभूव । तेन खलु बह्वोनिबन्धालिखिता लोकानुजिघृक्षया । तेषामन्यतमाब्रह्मसूत्रीया श्रीरघुवरीयावृत्तिरिति । इयं वृत्तिर्विशिष्टाद्वैतदर्शनस्यैकदेशभूतं यद्बौधायनदर्शनं तदाश्रित्यप्रवृत्ता । अनया च वृत्त्यावेदान्तसूत्राणिस्वसंमतबौधायनदर्शनपरतयानीतानि । यद्यपि सन्तिवेदान्तसूत्राणां बह्व्यष्टिका भिन्नार्थपरास्तथापि ते अधिकारिभेदमाश्रित्ययुक्ता इत्येवमतंन्यायः । इयं वृत्तिबौधायनवृत्त्यागतार्थेतिवक्तुं न शक्यते । ततोऽप्यधिकार्थत्वात्, बौधायनवृत्त्युक्तार्थानांविशदीकरणादुपपादनाच्च, यद्यपि श्रीशङ्करभगवत्पादैर्वेदान्तसूत्राणि अद्वैतपरतया व्यवस्थापितानि । तथापि इयं वृत्ति विशिष्टाद्वैतप्रतिपादनपराऽवश्यमुपादेया । तथाहि उपासना च ज्ञानञ्चेतिसाधनद्वयंमुक्तेर्दर्शितम् । तत्र उपासनामानसंकर्मैव । कर्म च द्वैते एव संभवति नाद्वैते । अतएव कर्ममीमांसाशास्त्रेण-सहब्रह्ममीमांसाशास्त्रस्यैकशास्त्रत्वं वैष्णवैः स्वीक्रियते । सिद्धार्थब्रह्मपरत्वे च वेदान्तानाम-प्रामाण्यंप्रसज्येत । अत उपासनाविधिशेषतयाब्रह्मपरत्वंवेदान्तानांवेदान्तसूत्राणाञ्च । उपासनया च भगवद्धामगतानां तज्ज्ञानोत्पत्त्याभगवत्सायुज्यप्राप्तिरूपापुनरावृत्तिरहितामुक्तिरपि अस्मिन् सम्प्रदायेस्वीक्रियमाणायुक्तैव । उपास्यञ्चभगवद्रूपंवेदान्तसूत्रेषुदर्शितम् । 'जन्माद्यस्ययतः 'तत एव प्राणः । आकाशस्तल्लिङ्गादित्यादि । एषांसूत्राणामुपासना परत्वञ्च वाचंधेनुमुपासीत—सूत्रं बह्वर्थसूचनादित्यादिवाक्यप्रदर्शितदिशाविज्ञेयम् । येऽपि अद्वैतमतस्यसूत्रश्रुतितात्पर्यगोचरत्वंमन्यन्ते तैरपिद्वैतसमर्थकस्यवैष्णवमतस्यमुक्तिसोपानत्वमवश्यमभ्युपेयमेव । उक्तं हि गीतायाम्—"अव्यक्ता हि गतिर्दुःखंदेहवद्भिरवाप्यते" इति । सन्ति हि श्रुतयः सर्वा अपिउपासनापरावैष्णवमतस्य द्वैतसमर्थकस्यानुकूलाः । वेदान्तसूत्रेषु च सर्वाण्यपिउपासनापराणिसूत्राणिगत्यागतिप्रतिपादकानि च द्वैतमेवसमर्थयन्ते । अतोविद्वद्भिः श्रीरघुवराचार्यैर्विरचिता विशिष्टाद्वैतप्रतिपादनपरावृत्तिः समीचीनेत्यहं मन्ये । इति वेदान्तसूत्रवृत्तिसमीक्षा ।

अन्यश्च श्रीरामानन्दाचार्यसम्प्रदाये 'अध्यासध्वंसलेलोनामग्रन्थः । अत्रहि—जगतःसत्यत्वं व्यवस्थाप्यब्रह्मणिजगतोऽध्यास इत्यद्वैतिमतंनिराकृतम् । अद्वैतवादिनोऽपि हि जगतो व्यावहारिकं सत्यत्वंस्वीकुर्वन्त्येव । वैष्णवानां तु अयमाशयः । जगतअध्यासिकत्वेऽर्थक्रियाकारित्वं न स्यात्—

यथा शुक्तिरूपस्य । जगतः शतसहस्त्रादिवर्षस्थायित्वञ्च न स्यात् । श्रुतिस्मृतिपुराणादिप्रामाण्यं न स्यात् । स्वस्वरूपस्यस्वविषयाणाञ्च मिथ्यात्वात् । प्रत्यक्षादिप्रमाणानाञ्च सर्वेषां प्रामाण्यं न स्यात् । असद्विषयकत्वात् । प्रत्यक्षादिप्रमाणानाञ्चाबाधितानामसद्विषयकत्वरूपमप्रमाण्यं कथं वक्तुंशक्यते । अवताराणांसिद्धानामृषिणाञ्चमिथ्यात्वंमिथ्यावादित्वञ्च प्रसज्येत । श्रीवाल्मीकिरामायणम्, महाभारतञ्च इतिहासरूपंमिथ्याभूतार्थप्रतिपादकत्वात् मिथ्यास्यात् । प्रत्यक्षादिप्रमाणानाञ्चबाधाभावेकथमप्रामाण्यं स्वीकुर्मः । किञ्च 'अथातो ब्रह्म जिज्ञासा' 'जन्माद्यस्ययतः' इति सूत्रद्वयं ब्रह्मणोजगज्जन्मादिकर्तृत्वंप्रतिपादयति । कर्तृत्वञ्च उपादानविषयकापरोक्षज्ञानचिकीर्षाकृतिमत्वम् । एतच्चजगतस्तदुपादानानामीश्वरस्य च विग्रहवतामिथ्यात्वेनोपपद्यते । सर्वे च जगतोव्याहारा व्यवहारा आहारा वेदा उपदेशा गुरुशिष्यपरम्परा सर्वमिदंस्वप्नोपमं मिथ्या स्यात् । अस्मिंश्च अध्यासध्वंसलेशनाम्नि ग्रन्थे—पारिभाषिकप्रत्यक्षलक्षणभङ्गोनामप्रथमः परिच्छेदः । वैयधिकरण्यभङ्गोनाम द्वितीयः परिच्छेदः । अधिष्ठानभङ्गोनाम तृतीयः परिच्छेदः । प्रतिबिम्बभङ्गोनाम चतुर्थः परिच्छेदः । जीवस्यब्रह्मैक्यभङ्गोनामपञ्चमःपरिच्छेदः । इत्येवं परिच्छेदपञ्चकंविस्तृतंसोपपत्तिकञ्च वर्तते । अस्य च ग्रन्थस्यसांख्यदर्शनम्, योगदर्शनञ्च न साहाय्यमाचरति—ताभ्यांप्रतिबिम्बवादाभ्युपगमात्—न्यायदर्शनंवैशेषिकदर्शनंमीमांसादर्शनञ्च एतस्यपक्षेस्थितानि दर्शनानि । एवञ्चाधिकारिभेदेनप्रवृत्त दर्शनत्रयानुसारि इदं दर्शनम् । अयं ग्रन्थश्चमान्य एव सताम् । यथा रुचियथाऽर्थित्वंयथा व्युत्पत्तिर्भिद्यते । एकोऽप्यर्थोगुणैर्बुद्धया बहुधासंप्रसाधितः । इति । कलौ तु सर्वाणिदर्शनानि विहाय एक एवभवाब्धिसंतरणोपायः । सचोक्तो भागवते—

त्यक्त्वासुदुस्त्यजसुरेप्सितराजलक्ष्मीं धर्मिष्ठ आर्यवचसा यदगादरण्यम् ।
मायामृगं दयितयेप्सितमन्वधावद् वन्देमहापुरुष! ते चरणारविन्दम् ।

"श्रीवैष्णवमताब्जभास्करः"

अत्र सन्तिमुख्यद्वादशविषयाः । ते चात्र क्रमेणात्रनिबन्धेविचार्यन्ते । तत्र प्रथमोविषयः प्रकृतितत्त्वनिरूपणम् । तत्र प्रकृतिर्नित्याज्ञा कस्यापिविकृतिर्न भवति, सर्वस्यकारणम्, अजन्मा अव्यक्तशब्दाभिधेया, परार्था महदहङ्कारादिप्रसवित्री- इति । एतच्च सांख्ययोगयोरपिसंमतम् । द्वितीयोविषयोजीवनिरूपणम् । नित्योज्ञः चेतनः (ज्ञानाधिकरणम्) अजः (अजन्मा) सततंपरवशः (ईश्वराधीनःकर्माधीनश्च) परमाणुसदृशोऽणुः । बद्धमुक्तादिभेदैर्भिन्नः, स्वर्गनरकादिगतिमान् निजकर्मफलभुक्, तत्त्वजिज्ञासुभिश्च जीव एव वेद्यः । एतच्चन्यायवैशेषिकानुसारिमतम् । किन्तु जीवस्याणुत्वंन्यायवैशेषिकमताभ्यांविशेषः ।

'अथेश्वरनिरूपणम्'

श्रीरामएवेश्वरः । स च जगज्जन्मस्थितिलयकर्तासूर्यचन्द्रयोरविभासकः, सर्वस्यापिजगतो भासकः यत्तेजसेन्दौसूर्याचन्द्रमसौजगद् भासयतः । तद् भीत्यावातोवाति, अवनिरपिसुतलं न याति ईश्वरःसर्वज्ञोनाज्ञः । साक्षीविश्वस्यभासकः । कूटस्थोःनिर्विकारः एकः, बहुशुभगुणवान्, अव्ययः -(अविनाशी) विश्वभर्तासर्वपालकः, श्रीमान् अर्च्यः शरण्यः—बहुविधविबुधैर्योगिभिश्च सेवितचरणक्लेशकर्मविपाकाशयैरस्पृष्टः सुयशाः सूरिमान्योवदान्यः । श्रीरामचन्द्र एवेश्वरः । सुमहितमहिमा, निर्मृत्युः, सर्वशक्तिः विकलुषोविजरःवाङ्मनसागोचरः । अत्र कश्चनकश्चर्नाश न्यायशास्त्रात् पुराणात् उपनिषद्भ्यश्च गृहीतः ।

"अथ मुक्तिसाधननिरूपणम्"

तप्तेनमूले भुजयोःसमङ्कनंशरेणचापेनतथोर्ध्वपुण्ड्कम् । नाम जपः । तुलसीमालाग्राह्या । गुरुदत्तोमन्त्रश्चग्राह्यः । इति । एतच्च नारदपञ्चरात्रे दृष्टम् ।

अथ गुरुलक्षणम्

यतेन्द्रियः शुचिःशुद्धवेषधृक् सुकुलोद्भवः । सदाचारपरोनम्रः शास्त्रज्ञोदेशना पटुः ।
विरक्तधर्मनिरतोध्यानाभ्यासीसुबुद्धिमान् । निग्रहेऽनुग्रहेचैवसमर्थोदेशिकोमतः ॥
हीनाङ्गोह्यधिकाङ्गश्चकपटीकृष्णदन्तवान् । नेत्ररोगी च कुष्ठी च वावदूकश्चवामनः ॥
व्यसनी बहुनिद्रश्चकुनखो बहुभोजनः । नेदृशोदेशिकोयोग्यो मुमुक्षोर्मुक्तिसाधने ॥

'अथ शिष्यलक्षणम्'

श्रद्धान्वितो विशुद्धात्मा मेधावीविनयीपटुः । कुलीनःसच्चरित्रश्च बुद्धिमान्व्रततत्परः ॥
गुरुशुश्रूषणेशक्तः आज्ञाकारीजितेन्द्रियः । अनुल्वणोभक्तिनिष्ठः शिष्य कार्यस्तुदेशिकैः ॥

उपाधिनिर्मुक्तस्यभगवतःअनन्यभावेनमुहुर्मुहुः सेवनम् भक्तिः । सा चानेकभेदा । सा च सततंतैलधारासमाभगवतो नित्यंसंस्मृतिरूपासंतानरूपा ईश्वरे परानुरक्तिः । सा च विवेकादिकसप्तजन्या । विवेकादयश्च सप्त—तल्लब्धिर्विवेकविमोकाभ्यासक्रियाकल्याणानवसादानुद्धर्षेभ्यः संभवान्निर्वचनाच्चेतिसूत्राद् वेदितव्याः । विवेकः कामानभिष्वङ्गः । उदारकीर्तेः श्रवणच्चकीर्त्तनंहरेर्मुदासंस्मरणंपदश्रितिः । समर्चनंवन्दनदास्यसख्यान्यान्मार्पणंसानवधेतिगीयते, इति पद्यानुसारेणभक्तिर्नवधा भिन्ना इति । एतच्चसर्वश्रुतिस्मृतिपुराणगीतासंमतमधिकारिभेदेन मान्यमेवेतिमन्ये ।

अथ भगवद्गीताया आनंदभाष्यम्

तत्रकर्मयोगाऽध्यायषट्केप्रतिपादितः । कर्मयोगश्चनिष्कामकर्मरूपः । फलाभिसन्धिरहितं क्रियमाणं कर्म न फलोपभोगरूपायबन्धायकल्पते । द्वितीयेऽध्यायषट्केभक्तियोगोमहापुरुषस्वरूपश्च

वर्णितम् । भक्तिश्चभगवतिपराऽनुरक्तिः । एवं षट्कद्वयेननिखिलमध्यात्मशास्त्रंसमापितम् । तृतीयषट्केन तु षट्कद्वयोक्तानापदार्थानांसंशोधनंकृतम् । यानि तु गीताशास्त्रेस्वमतविरुद्धानिवाक्यानिउपलभ्यन्तेतानिवैष्णवैरन्यथाऽव्याख्यायन्ते । तद् यथा "नित्यः सर्वगतस्थाणुरचलोऽयं सनातनः" इति अत्र जीवस्यसर्वगतत्वेन महत्त्वं प्रतीयते । वैष्णवैस्तु एवं व्याख्यायते । सर्वगते ईश्वरे अंशत्वेनतिष्ठतीति । एवञ्च जीवस्याणुत्वंसिद्धम् । गीताशास्त्रेज्ञानकर्मसमुच्चयो वैष्णवैःस्वीक्रियते, तदाधारभूतासु उपनिषत्सुच । अद्वैतवादिभिस्तु न स्वीक्रियते । तत्र वैष्णवानांमते प्रकृतिर्भगवतःशक्तिः, तया नित्यमवियुक्तस्यभगवतोज्ञानंध्यानरूपमुपासना । उपासना च कर्मैव मानसम् । अतस्तस्ययागहोमदानकर्मभिःसहविरोधः ।

अद्वैतवादिनां मते तु अद्वितीयात्मविज्ञानंज्ञानम् । तेन सह कर्मणां विरोधः । इत्यद्वैतिनोज्ञानकर्मजमुच्चयवादंप्रक्षिपन्ति । वस्तुतस्तु गीतायास्तात्पर्यंकर्मणिभक्तौ च, अर्जुनं प्रति भगवतउपदेशस्ययुद्धेकर्मणिप्रवर्तनार्थत्वात् । अर्जुनस्य तु पुत्रदारादिरक्तस्यज्ञानमार्गेऽनधिकारात्तंप्रतिज्ञानोपदेशस्तुप्रसंगसंगत्याकृतः । अतएवोक्तंगीतासु—मदर्थमपिकर्माणिकुर्वन् सिद्धिमवाप्स्यसि ।" इति "न कर्मणामनारम्भान्नैष्कर्म्यंपुरुषोऽश्नुते । न च सन्यसनादेवसिद्धिंसमधिगच्छति" इति । कुरुकर्मैवतस्मात्त्वंपूर्वैं पूर्वतरैः कृतम्" इति । अतएवोपनिषत्सुउक्तम् "कुर्वन्नेवेह कर्माणिजिजीविषेच्छतंसमाः । एवं त्वयि नान्यथेतोऽस्ति न कर्मलिप्यतेतरे" इति । गीताशास्त्रं च "कर्मणैव हि संसिद्धिमास्थिता जनकादयः" इति वदत्कर्मणैव संसिद्धिमयंमोक्षंमन्यते । निष्कामकर्मयोगस्य च प्रशंसा भगवता स्वयं कृता गीताशास्त्रे "इमं विवस्वतेयोगंप्रोक्तवानहमव्ययम् । विवस्वान् मनवेप्राहमनुरिक्ष्वाकवेऽब्रवीत् । एवं परम्पराप्राप्तमिमंराजर्षयोविदुः । स कालेनेहमहतायोगोनष्टःपरन्तप ? । उपदिष्टोमयातेऽद्यरहस्यं ह्येतदुत्तमम् " इति । अन्ते मध्ये च शरणागतिरूपं भगवत्प्रातिसाधनंवैष्णवानामभिमतमुपदिष्टं गीतायाम् "मामेव शरणं गच्छ सर्वभावेनभारत ? । मत्प्रसादात्परां शान्तिं स्थानं प्राप्स्यसिशाश्वतमिति । "सर्वधर्मात्परित्यज्य मामेकं शरणं व्रज । अहं त्वां सर्वपापेभ्योमोक्षयिष्यामि मा शुच" इति एकमिति च पदं द्वितीयमीश्वरंप्रतिषेधति । एवमुपनिषत्स्वपिज्ञेयमिति । वैष्णवानामभिप्रायः । गीतायांसांख्ययोगाद्वैतमतप्रतिपादनन्तुप्रासङ्गिकम् । अधिकारिभेदेनचेत्यवधेयम् ।

ब्रह्मसूत्रेषु-आनंदभाष्यम्

तत्र एकशतोत्तरषष्ठ्यधिकरणानां प्रथमाध्यायेप्रथमेपादेब्रह्मजिज्ञासाधिकरणंप्रथमम् । यत्र शास्त्रारम्भसमर्थनार्थंब्रह्मजिज्ञास्यत्वेन विचारितम् । द्वितीयंजगज्जन्माधिकरणम् यत्र ब्रह्मणो जगज्जन्मादिकर्तृत्वरूपंलक्षणंदर्शितम् । तृतीयंशास्त्रयोनित्वाधिकरणम् । इदमपि ब्रह्मणोलक्षणमेव शास्त्रयोनिपदे च द्विधा समासः । शास्त्रस्य योनिः । शास्त्रयोनिर्यस्येति । चतुर्थे समन्वया

धिकरणे उपासनाविधिशेषतयाब्रह्मणिवेदान्तानांसमन्वयःप्रदर्शितः । पञ्चममीक्षत्यधिकरणम् । अत्रप्रधानादिकंजगत्कारणमितिमतंप्रत्याख्यायसर्वज्ञस्यसर्वशक्तिमतःसगुणस्यब्रह्मणिजगत्कारणत्वं व्यवस्थापितम् । आनन्दमयाधिकरणे आनन्दमयस्यभगवतो जीवादन्यत्वंसाधितम् । अन्तरधिकरणे आदित्यान्तर्गतोऽक्ष्यन्तर्गतश्चपुरुषोजीवादन्यःपरमात्मैव इति प्रसाधितम् । आकाशाधिकरणे आकाशपदवाच्यंसर्वजगत्कारणंपरंब्रह्मैवेतिविचारितम् । प्राणाधिकरणे प्राणशब्देनपरमात्मैव गृह्यते न तु प्राणोपलक्षितो जीव इति व्यवस्थापितम् । ज्योतिरधिरणेज्योतिःशब्दवाच्यं आदित्यादिप्रकासकंपरंब्रह्मैवेतिनिर्णीतम् । प्राणानुगमाधिकरणेप्राणशब्देनपरमात्मैवेतिव्यवस्थापितम् । प्रथमाध्यायेद्वितीयेपादेसर्वत्रप्रसिद्ध्यधिकरणेमनोमयत्वादिधर्मकः उपास्यत्वेनपरमात्मैवपरिगृह्यते इति निर्धारितम् । अत्ताधिकरणे अत्ताचराचरस्यपरमात्मैव इति प्रसाधितम् । गुहाप्रविष्टाधिकरणेजीवपरमात्मानावेव गुहा प्रविष्टौ इति साधितम् । अन्तराधिकरणे अन्तरःपरमात्मैव न जीव इति साधितम् । अन्तर्याम्यधिकरणे अन्तर्यामीपरमात्मैवेतिनिर्णीतम् । अदृश्यत्वादिगुणकाधिकरणे–अदृश्यत्वादिगुणकोभूतयोनिरक्षरःपरमात्मैव इति दर्शितम् । वैश्वानराधिकरणे–वैश्वानरः परमात्मा इति निर्धारितम् । प्रथमाध्यायेतृतीयपादेद्युभ्वाद्यधिकरणेद्युभ्वाद्यायतनंपरमात्मेतिनिर्णीतम् । भूमाधिकरणेअनन्तसुखरूपः परमात्मैवेतिव्यवस्थापितम् । अक्षराधिकरणे अक्षरमविनाशिपरमात्मैव अम्बरान्तधृतेरितिनिर्णीतम् । ईक्षतिकर्माधिकरणे--ईक्षतिकर्मेक्षणविषयःपरमात्मैव--ईक्षतिकर्मत्वेन श्रुतौव्यपदेशादिति निर्णीतम् । दहराधिकरणेदहराकाशःपरमात्मैव–उत्तरेभ्योवाक्यशेषगतेभ्योहेतुभ्यः । प्रमिताधिकरणे अद्भुतमात्रः पुरुषोऽत्रपरमात्मैव प्रमितः 'ईशानोभूतभव्यस्येतिश्रूयमाणशब्दबलादेव । देवताधकिरणेमनुष्याणामुपरिदेवादयस्तेषामपि ब्रह्मविद्यायामधिकारोऽस्तीति बादरायणमतंनिर्धारितम् । मध्वधिकरणेदेवानामुपास्योपासकभावस्यैकस्मिन्नसंभवान्मधुविद्यायामनधिकार इति जैमिनिमतं. दर्शितम् ।

अपशूद्राधिकरणे–शूद्रस्योपनयनाभावेनब्रह्मविद्यायामनधिकार इति दर्शितम् । कम्पनाधिकरणे "प्राणएजतिनिःसृतम्" इति श्रुतौ प्राणशब्देनपरमात्मैवाभिहितः– मुख्यप्राणादिसहितस्यकृत्स्नस्यजगतःकम्पनात्–जीवनादिचेष्टाहेतुत्वादितिवर्णितम् । ज्योतिर्दर्शनाधिकरणे–ज्योतिः शब्दाभिहितःपरमात्मैव, 'एष आत्मा अपहतपाप्मा' इति ब्रह्मणःश्रवणादितिदर्शितम् । अर्थान्तरत्वादिव्यपदेशाधिकरणे "आकाशो ह वै नामरूपयोर्निर्विहिता" इति श्रुतौ आकाशःपरमात्मा नामरूपभिन्नत्वेनब्रह्मत्वव्यपदेशात् । चतुर्थेपादे–आनुमानिकाधिकरणे–जगत्कारणंप्रधानमितिसांख्यमतंखण्डितम् । चमसाधिकरणेअजाशब्देन, ब्रह्मशक्तिभूताब्रह्मात्मिकाप्रकृतिरभिधीयते इति व्यवस्थापितम् । संख्योपसंग्रहाधिकरणेपञ्चजना इति सांख्यतत्त्वानि नाभिधीयन्ते किन्तु प्राणादय इति दर्शितम् । कारणत्वाधिकरणे रामनाम्नःसर्वशब्दकारणत्वेनपदवाच्यस्य श्रीरामस्यब्रह्मणोऽन्यनिखिलशब्दवाच्यानांसर्वेषांबीजत्वोपपादनद्वारातस्यसर्वशब्द-

वाच्यादिकारणत्वं बोधितम् । जगद्वाचित्वाधिकरणेकौषीतकिब्राह्मणे 'यो वै बालके' इति श्रुतौ सांख्यतन्त्राभिमतः पुरुषो न वेदितव्यतयोपदिष्टः । तस्य जगत्कर्तृत्वाभावात् किन्तु परमात्मैवेति निर्णीतम् । वाच्यान्वयाधिकरणे 'आत्मा वारे द्रष्टव्यः' इत्यादिश्रुतौ परमात्मैवद्रष्टव्यत्वेनोपदिष्टः । उपक्रमादिभिर्लिङ्गैरस्यवाक्यस्यब्रह्मण्येवसमन्वयदर्शनात् इत्युक्तम् । प्रकृत्यधिकरणे ब्रह्मजगतःप्रकृतिरुपादानकारणंनिमित्तकारणञ्च कुतः ब्रह्मविज्ञानेनसर्वविज्ञानरूपायाःप्रकृतेः, मृद्विज्ञानेसर्वमृण्मयविज्ञानरूपस्यदृष्टान्तस्यचानुपरोधादितिनिर्णीतम् । अतःपरंसर्वव्याख्यानाधिकरणम्—प्रथमाध्यायसमाप्तिः । द्वितीयाध्यायस्यप्रथमेपादेस्मृत्यधिकरणंप्रथमम्—तत्र न ब्रह्मणोजगत्कारणत्वमास्थेयम् कापिलादिस्मृत्यनवकाशप्रसङ्गादित्याशङ्क्य गीतादिस्मृत्यनवकाशप्रसंगेनसमाहितम् । सांख्यप्रत्याख्याननिदर्शनेनयोगप्रत्याख्यानवचनंद्वितीयाधिकरणे । विलक्षणत्वाधिकरणेतृतीये—ब्रह्मणो न जगत्कारणत्वमुपादानोपादेययोर्विलक्षणत्वात् । उपादानं ब्रह्मचिद्रूपमानन्दादिरूपञ्चचिदचिदात्मकं जगत्तुजडंदुःखादिमच्चेत्याशङ्क्य उपादानोपादेययोर्विलक्षणत्वस्यलोकेदर्शनात्समाहितम् । दृश्यते हि चेतनात्पुरुषादचेतनस्यकेचनस्वादेर्जन्म । गोमयादचेतनस्यवृश्चिकस्योत्पत्तिरिति । अपीतौतद्वाप्रसङ्गादित्यपिसमाहितम् । न तु दृष्टान्तभावात् इति । ततः शिष्टापरिग्रहाधिकरणेतर्कम्—कपिलादिस्मृतिकरणेन तर्कपरिगृहीतानांपतञ्जलिकणादगोतमादिस्मृतिनामपि निराकरणंदर्शितम् । भोक्तापत्यधिकरणेब्रह्मणोऽपिशरीरसामान्यसत्त्वादभोगः स्यादित्याशंकातस्यकर्मपारवश्याभावेनवारितम् । आरम्भणाधिकरणेकारणाद्ब्रह्मणःकार्यस्यजगतोऽनन्यत्वम् । आरम्भणशब्दादिभ्योहेतुभ्यः प्रसाधितम् । इतरव्यपदेशाधिकरणे—जीवस्यब्रह्मानन्यत्वव्यपदेशोऽहिताकरणादिदोषप्रसक्तिमाशङ्क्य जीवादर्थान्तरभूतंब्रह्मश्रुतिषुभेदनिर्देशादिति समाहितम् । उपसंहारदर्शनाधिकरणे असहायस्यब्रह्मणो न जगत्कर्तृत्वमुपादानत्वञ्चोपपद्यते इत्याशङ्क्याक्षीरदृष्टान्तेनसमाहितम् । कृत्स्नप्रसक्त्यधिकरणे ब्रह्मणोजगत्कारणत्वेकृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा इत्याशङ्क्य श्रुतेस्तुसब्दमूलत्वादितिसमाहितम् । प्रयोजनत्वाधिकरणे—अवाप्तसमस्तकामस्यब्रह्मणोजगत्सृष्ट्यादिव्यापारो न संभवति इत्याशङ्क्य-लोकवत्तुलीलाकैवल्यमितिसमाहितम् । द्वितीयाध्यायस्यद्वितीयेपादे रचनानुपपत्त्यधिकरणेन अनुमीयमानंप्रधानं न जगत्कारणम् अचेतनत्वेनरचनानुपपत्तेरितिसमाहितम् । महद्दीर्घाधिकरणे परमाणवोद्व्यणुकाद्युत्पादनक्रमेणाखिलंब्रह्माण्डंजनयन्तीतिनैयायिकादिमतंनिराकृतम् । समुदायाधिकरणे बाह्यसमुदायोभूतभौतिकरूपः तस्य परमाणवः कारणम् । आन्तरःसमुदायः । चित्रचैत्रिकरूपःतस्यरूपविज्ञानवेदनासंज्ञासंस्काररूपंस्कन्धपञ्चकंकारणमिति बौद्धमतंनिराकृतम् । उक्तहेतुकेऽपिसमुदायेनसमुदायसिद्धिः । तत्कारणभूतानांपरमाण्वादीनांक्षणिकत्वाभ्युपगमात् । उपलब्ध्यधिकरणे विज्ञानातिरिक्तानामर्थानामभावोनोपपद्यते । कुतः ? ज्ञानातिरेकेणपदार्थोपलब्धेः, इति साधितम् । सर्वथानुपपत्यधिकरणे सर्वशून्यत्वरूपंतुच्छत्वंनोपपद्यते । प्रमाणप्रमेयप्रमातृ-

रूपाणांपदार्थानामबाधेनसततमुपलम्भादितिसाधितम् । एकस्मिन्नसंभवाधिकरणे न युक्तोऽनेकान्तवादोजैनानाम् । एकस्मिन् वस्तुनिनित्यत्वानित्यत्वसत्त्वासत्त्ववक्तव्यत्वावक्तव्यत्वादीनांपरस्परविरुद्धानां धर्माणामसंभवात् इति दर्शितम् । पत्यधिकरणेपत्युःपरमेश्वरस्यजगतःकेवलमधिष्ठातृत्वमिति कापालिकमतंप्रत्याख्यायपरमेश्वरस्यजगदुपादानत्वमपीतिप्रसाधितम् । उत्पत्यसंभवाधिकरणे न पाञ्चरात्रवचनानांजीवोत्पत्तौतात्पर्यम् । जीवोत्पत्तेरसंभवादितिसाधितम् । द्वितीयाध्यायस्यतृतीयेपादे वियदधिकरणेअस्त्येवाकाशस्योत्पत्तिरितिसाधितम् । तेजोऽधिकरणे वायोस्तेजउत्पद्यते इति साधितम् । विपर्ययाधिकरणेसृष्टिक्रमाद्विपर्ययेणलयक्रम इति साधितम् । अन्तराविज्ञानाधिकरणेसर्वस्यजगतःसाक्षात्ब्रह्मणएवोत्पत्तिरविशेषादितिसाधितम् । आत्माधिकरणे—आकाशादिवज्जीवस्योत्पत्तिंनिराकृत्यतस्यब्रह्मकार्यत्वंनित्यत्वञ्च साधितम् । ज्ञाधिकरणे अयमात्माज्ञातृस्वरूप एव, न तु ज्ञानमात्र स्वरूप इति दर्शितम् । कर्त्राधिकरणे— आत्मैवजगतःकर्ताशास्त्रार्थवत्वादितिनिर्णीतम् । अंशाधिकरणे—अयं जीवो ब्रह्मांश एव नानात्वव्यपदेशादेकत्वव्यपदेशाच्चेतिनिर्धारितम् । द्वितीयाध्यायस्यचतुर्थपादे प्राणोत्पत्यधिकरणेंवियदादिवदेवप्राणाउत्पद्यन्ते इति साधितम् । सप्तगत्यधिकरणेज्ञानेन्द्रियकर्मेन्द्रियमनांसिएकादशेन्द्रियाणि इति व्यवस्थापितम् प्राणाणुत्वाधिकरणे अणव एव प्राणा इन्द्रियरूपाःपञ्चप्राणरूपाश्चेति व्यवस्थापितम् । श्रेष्ठयाधिकरणे--श्रेष्ठः प्राणोऽप्युत्पद्यते इति निर्णीतम् । वायुक्रियाधिकरणे भूतेषु परिगणितोवायुरेवप्राण इति साधितम् । श्रेष्ठाणुत्वाधिकरणे मुख्यःप्राणोऽणुरितिसाधितम् । ज्योतिराद्यधिष्ठानाधिकरणे देवताऽधिष्ठितानामेवकरणानां प्रवृत्तिरिति साधितम् । इन्द्रियाधिकरणे श्रेष्ठप्राणभिन्नान्येवेन्द्रियाणि इति प्रसाधितम् । संज्ञामूर्तिक्लृप्त्यधिकरणे परमात्मनोंऽशस्यप्रजापतिरूपस्यजीवस्यैवसमष्टिरूपस्यजगत्कर्तृत्वमितिनिर्धारितम् । तृतीयाध्यायस्यप्रथमेपादे—तदन्तरप्रतिपत्त्यधिकरणे--देहान्तरगमने तदारम्भकैर्भूतसूक्ष्मैःसंपरिष्वक्त एव जीवोरंहति गच्छति प्रश्नेनतदुत्तरेणचैतदवगम्यते इति निर्णीतम् । कृतात्ययाधिकरणे—स्वर्गस्य प्राप्तयेकृतस्यकर्मणोभोगेनात्ययेसतिभुक्तशिष्टकर्मवानेवचन्द्रमण्डलात्प्रत्यवरोहति । तथा श्रुतिस्मृतिदर्शनादितिसाधितम् । अनिष्टादिकार्याधिकरणेअनिष्टादिकारिणामपिचन्द्रमण्डलेगमनमस्ति तेषामपितत्रगमनस्यश्रवणादितिदर्शितम् । संभाव्यापत्त्यधिकरणे शोभादिषुपुण्यपापोपभोगार्थंसाम्यापत्तिरेव सारूप्यमेवावश्यकम् इति दर्शितम् । नातिचिराधिकरणे अचिरकालमेवाकाशादिभावेनावतिष्ठते । व्रीह्यभावप्राप्त्यनन्तरंविशिष्यदुर्निष्क्रमेणवचनादितिनिर्णीतम् । अन्याधिष्ठिताधिकरणे अन्यैर्जीवैरधिष्ठिते व्रीह्यादावनुशायिनांजीवानांसंसर्गमात्रंभवति आकाशादिवर्षान्तसंसर्गमात्रवत् । इति निर्णीतम् । तृतीयाध्यायस्यद्वितीयेपादेसंध्यधिकरणे स्वाप्निकरथादीनांमायामात्रस्वरूपाणांपरमात्मैवस्रष्टा इति निर्णीतम् । तदभावाधिकरणे सुषुप्तौस्वप्नाभावःसुषुप्तिर्नाड़ीषुपुरीततिपरमात्मनि च भवति इति निर्णीतम् । कर्मानुस्मृतिशब्दविध्यधिकरणे यस्तावत्पूर्वंसुप्तः स एव जीवः प्रबुध्यते नान्य इति निर्धारितम् ।

मुग्धाधिकरणे मूर्च्छाऽर्धसंपत्तिरितिनिर्णीतम् । उभयलिङ्गाधिकरणेजीवप्राप्यस्यब्रह्मण उभयलिङ्गताउक्ता । अहिकुंडलाधिकरणे ब्रह्मणश्चिदचिदंशद्वयवत्त्वं दर्शितम् । पराधिकरणे ब्रह्मणः-परंकिञ्चित्प्राप्यंनास्ति इति दर्शितम् । फलाधिकरणे जीवस्यभोगापवर्गादिलक्षणंफलं परमपुरुषादेवसंपद्यते इति दर्शितम्। तृतीयाध्यायस्यतृतीये पादे सर्ववेदान्तप्रत्ययाधिकरणे सर्वेषुवेदान्तेषुविद्यैकाप्रतिपादितम्। अन्यथात्वाधिकरणे विद्याभेदमाशङ्क्यविद्यैकामेवसमर्थितम् । सर्वाभेदाधिकरणे अपिविद्यैकामेवसमर्थितम् । आनन्दाद्यधिकरणे सर्वासुउपनिषत्सुउपास्येब्रह्मणिसर्वत्रसर्वगुणोपसंहारोदर्शितः । कार्याख्यानाधिकरणे अप्राप्तस्यैवविधानेशास्त्रणामर्थवत्वंप्रसाधितम् । समानाधिकरणे शाण्डिल्यविद्यावाजसनेयकविद्ययोःसमानत्वंव्यवस्थापितम् । संबन्धाधिकरणेरूपभेदेविद्याभेदोव्यवस्थापितः । संभृत्यधिकरणे संभृत्यादिगुणविशिष्टमुपासनान्तरमिति व्यवस्थापितम् । पुरुषविद्याधिकरणे फलभेदात् पुरुषविद्यानांभेदःसाधितः । वेधाद्यधिकरणे अभिचारादिषुउक्तानांमन्त्राणांविद्याङ्गत्वंनेतिसाधितम् । हान्यधिकरणेहानिवाक्येउपायनस्यापिश्रवणात् द्वयोःसमुच्चयोऽभिप्रेत इति साधितम् । साम्परायाधिकरणे विद्याविपाकाद्देहापक्रमणकाल एव ब्रह्मविदःसुकृतदुष्कृतयोर्हानमिति दर्शितम् । अनियमाधिकरणे सर्वविद्यावतामर्चिरादिमार्गेणैवगमनमितिदर्शितम् । अक्षरध्यधिकरणेसर्वेषांब्रह्मगुणानांसर्वविद्यासुउपसंहार इति दर्शितम् । आन्तरत्वाधिकरणेउभयत्रापि आन्तरत्वविद्या एकैवेतिनिर्णीतम् । कामाद्यधिकरणे छान्दोग्येबृहदारण्यके च विद्या एकैव इति निर्णीतम् । तन्निर्धारणानियमाधिकरणे कर्माङ्गविद्यानांकर्मविद्यासु अनियमेनोपसंहार इति दर्शितम् । प्रदानाधिकरणे गुणभेदविशिष्टस्यब्रह्मणश्चिन्तनंभिन्नमेव इति दर्शितम् । लिङ्गभूयस्त्वाधिकरणे लिङ्गस्यप्रकरणाद् बलीयस्त्वंदर्शितम् । आत्मनःशरीरभावाधिकरणे असंसारीआत्मा-अनुसन्धेय इति साधितम्। अङ्गावबद्धाधिकरणे उद्गीथाद्यङ्गावबद्धाविद्यासर्वशाखासु एकैव इति साधितम् । भूमज्यायस्त्वाधिकरणे समस्तोपासनस्यैवज्यायस्त्वंनव्यस्तोपासनस्येति प्रतिपादितम् । शब्दादिभेदाधिकरणे सर्वाविद्याः परस्परं भिन्ना एवेतिप्रतिपादितम् । विकल्पाधिकरणे ब्रह्मप्राप्तिफलानांदहरादिविद्यानामनुष्ठानेविकल्प इति प्रदर्शितम् । यथाश्रयभावाधिकरणे क्रत्वङ्गोद्गीथादिसमाश्रितानांविद्यानांक्रत्वङ्गतयानियमेनोपादानमिति व्यवस्थापितम् । तृतीयाध्यास्यचतुर्थेपादे पुरुषार्थाधिकरणेब्रह्मविद्यातःपुरुषार्थोब्रह्मानुभवलक्षण इति निर्णीतम् । स्तुतिमात्राधिकरणे उद्गीथाद्युपासनानांरसतमत्वादिगुणानाञ्चापूर्वत्वाद् प्रमाणान्तराप्राप्तत्वाद् यागादिवद्विधेयत्वमेवेतिदर्शितम् । पारिप्लवार्थाधिकरणे औपनिषद् कथानां न परिप्लवशेषत्वमितिदर्शितम् । अग्नीन्धनाद्यधिकरणे ब्रह्मविद्यायाःस्वफलप्राप्तौशेषत्वेनयज्ञकर्मणामपेक्षानास्तीतिदर्शितम् । सर्वापेक्षाधिकरणे कर्माणियोग्यताबलाद् ज्ञानोत्पत्तावुपयुज्यन्ते न मोक्षे योग्यताभावादितिनिर्धारितम् । शमदमाद्यधिकरणेमुमुक्षुर्ब्रह्मविद्यार्थीगृहस्थःशमाद्युपेतःस्यादेवेति दर्शितम् । सर्वान्नानुमत्यधिकरणे प्राणात्यय एव परस्यामापदिविद्वांसंप्रतिसुरावर्जं सर्वमन्नमदनीयत्वेनानुमतं

नानापदि । विहितत्वाधिकरणे यज्ञादीनिकर्माणिकेवलाश्रमिणाऽप्यनुष्ठेयानीतिप्रसाधितम् । विधुराधिकरणे विधुराणामपिब्रह्मविद्यायामधिकार इति साधितम् । तद्भूताधिकरणे नैष्ठिकादेरनाश्रमित्वेनावस्थानंप्रमाणरहितमिति न तेषां ब्रह्मविद्यायामधिकार इति साधितम् । स्वाम्यधिकरणे क्रतुवत्क्रत्वङ्गोपासनमपि ऋत्विक्कर्तृकमेवस्वामिनेफलप्रदमितिदर्शितम् । सहकार्यन्तरविध्यधिकरणे सर्वाश्रमेषुमौनतृतीयसचिवाब्रह्मप्राप्तिसाधनीभूताविद्या इति दर्शितम् । अनाविष्काराधिकरणे विदुषा बालवत् मानापमानौविहायस्वस्वरूपमप्रकाश्यलोकेस्थेयम् बालस्यशौचाचारराहित्यन्तुनानुकार्यम् इति दर्शितम् । ऐहिकाधिकरणे ब्रह्मविद्यार्थमनुष्ठितंकर्मसति प्रतिबन्धाभावेइहैवजन्मनिब्रह्मविद्यारूपं-फलंसूतेप्रतिबन्धेसतितुजन्मान्तरे इति निर्णीतम् । मुक्तिफलाधिकरणे सततब्रह्मस्मृतिरूपायां विद्यायांसत्यमिहैव मुक्तिर्भवति । अन्यथा तु जन्मान्तरेऽपि इति निर्णीतम् । चतुर्थाध्यस्यप्रथमे-पादे आवृत्त्यधिकरणे ब्रह्मस्मृतेःसततमावृत्तिःकर्त्तव्येति साधितम् । स्मृतिर्वेदना उपासना च एकार्थकान्येवपदानि इति दर्शितम् । आत्मत्वोपासनाधिकरणेउपासकेनस्वात्मतयैवोपास्यंब्रह्मेति साधितम् । प्रतीकाधिकरणे मनआदौप्रतीकेनात्मबुद्धिर्कर्त्तव्येतिनिर्णीतम् आदित्यादिमत्यधिकदणे कर्माङ्गे उद्गीथादौ आदित्यादिमतयःकर्त्तव्या इति निर्णीतम् । आसीनाधिकरणे नासाग्रदृष्टिः सन् आसीन एवोपासनंकुर्यादितिसाधितम् । आप्रायणाधिकरणे आप्रायणमुपासनाऽऽवृत्तिःकर्त्तव्येतिदर्शितम् । इतराधिकरणे विदुषःउत्तरपूर्वयोःपुण्यपापयोःशरीरान्तरहेतुभूतयोर्विद्याप्रभावेणश्लेषविन्त-शाम्यामारब्धकर्मणश्चभोगेनैवक्षयेदेहान्तरेसति अवश्यं मुक्तिरिति उक्तम् । अनारब्धकार्याधिक-करणे संचितेपुण्यपापेविनश्येतविद्याया नतु प्रारब्धकर्मेतिसाधितम् । तदधिगमाधिकरणे ब्रह्मविद्याप्राप्तौतद्बलादुत्तरपूर्वयोरर्थयोरश्लेशविनाशौभवत इति व्यवास्थापितम् । अग्निहोत्राधिकरणे होत्रादिकंकर्मतुविद्याकार्यायैव इति निर्णीतम् । इतरक्षपणाधिकरणे भोगेनैवप्रारब्धेपुण्यपापेक्षप-यित्वामुच्यते एकेनजन्मनाबहुभिर्जन्मभिर्वा इति निर्णीतम् । चतुर्थाध्यायस्यद्वितीयेपादेबागधिकरणे मृयमाणस्यवाग्मनसासंपद्यते इत्युक्तम् । संपत्तिरत्रविलक्षणसंयोगः । मनोऽधिकरणे मनःप्राणेसंपद्यते इत्युक्तम् । अध्यक्षाधिकरणेप्राणःअध्यक्षेजीवेसंपद्यते इत्युक्तम् । भूताधिकरणेजीवसचिवप्राणोभूतेषु संपद्यते इत्युक्तम् । आसत्त्युपक्रमाधिकरणे ब्रह्मविदोऽपिआसत्त्युपक्रमात् (नाडी प्रवेशात्) प्राक् समानैव-संसारिणउत्क्रान्तिरितिवर्णितम् । परसंपत्त्यधिकरणे सबीजानिभूतसूक्ष्माणिपरस्मिन्नात्मन्येवसम्पद्यन्ते इति उक्तम् । अविभागाधिकरणे परमात्मनासहविलक्षणसंयोगरूपा इयं संपत्तिरितिनिर्धारितम् । तदोकोऽधिकरणे ब्रह्मविदःशताधिकयामूर्धन्यययानाडयोत्क्रमणम् अन्यस्यविदुषस्तुनाडयन्तरेणेतिनिर्णीतम् । रश्म्यनुसाराधिकरणे रश्म्यनुसारेणैवब्रह्मविदोगमनम् इति निर्धारितम् । दक्षिणायनाधिकरणे दक्षिणायनेमृतस्यब्रह्मविदश्चन्द्रलोकावाप्तावपि न ततःपुनर्निवृत्तिरस्तस्येत्युक्तम् । चतुर्थाध्यायस्यतृतीयेपादेअर्चिरधिकरणेब्रह्मप्राप्तेरेकएवार्चिरादिलक्षणोऽध्वेतिनिर्णीतम् । वाय्वधिकरणे देवलोक-

वायुशब्दाभ्यामविशेषाभ्यांवायुरेवाभिधीयते अत:संवत्सरात्परंवायुमेवाभिगच्छतीतिनिर्णीतम् । वरुणाधिकरणे तडितऊर्ध्वमेववरुणोनिवेशनीय:, उभयोर्मेघसंबन्धादितिसाधितम् । आतिवाहिकाधिकरणे ब्रह्मविदामतिवहनकर्तार एवैतेपरमात्मनोनियुक्तादेवताविशेषा एतेऽर्चिरादय इति निर्णीतम् । कार्याधिकरणे कार्यब्रह्मोपासकस्यकार्यब्रह्मप्राप्तिर्नतुपरब्रह्मविद इति अत्राधिकरणेनिर्णीतम् । चतुर्थाध्यायस्यचतुर्थेपादे संपद्याविर्भावाधिकरणे ब्रह्मविद्यायास्वाभाविकस्यस्वस्वरूपस्यैवाविर्भावो नतु देवादिस्वरूपाभिनिष्पत्तिरितिप्रसाधितम् । अविभागेनदृष्टत्वाधिकरणेपरंज्योतिरुपसंपद्यप्रक्षीणकर्मबन्ध:प्रत्यगात्ममुक्तावविभागेनतितीष्ठतिसाधितम् । ब्राह्माधिकरणे मुक्तौप्रत्यगात्मन:स्वरूपतोगुणतश्चापहतपाप्मत्वादिकर्मैवोपपद्यते नतु विज्ञानमात्रस्वरूपत्वमितिजैमिनिमतम् । चितितन्मात्रेणरूपेणप्रत्यगात्माऽवतिष्ठते इत्यौडुलोमिराचार्योमन्यते । ज्ञानिनोविज्ञानमात्रस्वरूपत्वाङ्गीकारेऽपितत्रअपहतपाप्मावादीनांगुणानां प्रकरणावगतानामविरोधंबादरायणोमन्यते इति दर्शितम् । संकल्पाधिकरणेसंकल्पादेवब्रह्मविद:सर्वकामावाप्तिरितिदर्शितम् । अभावाधिकरणेमुक्तात्मन:शरीरेन्द्रियाणामभावंबादरिराचार्योमन्यते । जैमिनिस्तुतस्यशरीरेन्द्रियाणांभावंमन्यते । बादरायणस्तुसंकल्पवैचित्र्यादुभयंमन्यते ।

जगद्व्यापारवर्जनाधिकरणे जगद्व्यापारवर्जंमुक्तात्मन ऐश्वर्यं जगदीश्वरवद् भवति इति दर्शितम् । एवं वेदान्तसूत्राणामानन्दभाष्ये श्रीराम एव परं ब्रह्म श्रीरामषडक्षरमन्त्रराजएवपरोमन्त्र:,ब्रह्मविदोऽर्चिरादिमार्गेणब्रह्मप्राप्ति:,तत:पुनरावृत्त्यभाव:ब्रह्मोपासनाभिर्विविधाभि:ज्ञानकर्मसमुच्चयसम्बलितभक्त्याच ब्रह्मप्राप्तिरित्यादिका:सिद्धान्ता:दर्शिता:।ईशोपनिषदानन्दभाष्ये यत:परमपुरुषस्यसर्वान्त:प्रविष्टत्वात् सर्वमेवतस्यशरीरम् तस्मात् सर्वंब्रह्मात्मकमितिकिमपिकस्यापिभोग्यंनास्तीत्यत:परमात्मभिन्नसर्वविषयमाशांपरित्यजेदित्यर्थ:प्रथममन्त्रस्यआनन्दभाष्येदर्शित:। ब्रह्मविद्याङ्गभूतंकर्ममुमुक्षुणामपियावज्जीवंकर्त्तव्यमेवेति द्वितीयमन्त्रार्थ: । ये अज्ञानिनस्तेआत्मघानिन:तेषांदुष्कृतकारिणांरौरवादिसंज्ञकानिरयाभवन्ति । अतो ब्रह्मज्ञानायप्रयतनीयमितितृतीयमन्त्रार्थ: । ब्रह्मअगच्छदपिमनसोवेगवत्तरम् इन्द्रियेभ्योऽपिवेगवत्तरम् तिष्ठदपिअन्यानत्येतितस्मिन् स्थितोवायु:सर्वंधर्तुशक्नोतीतिचतुर्थमन्त्रार्थ: । ब्रह्म अनेजदपि शरीराद्यनुप्रविष्टएजतीवातत् उपहितंदूरेअनुपहितमन्तिकेतद् व्यापकतया सर्वस्यान्त:सर्वस्यबाह्यतश्चेतिपञ्चममन्त्रार्थ: । य: सर्वाणिभूतान्यात्मनि पश्यति सर्वभूतेषुचात्मानंपश्यतितेनस्वात्मविभूतित्वावगमात् न निन्दां कस्यचित् करोतीति षष्ठमन्त्रार्थ: । यस्मिन् सर्वस्यब्रह्मात्मकत्वानुसंधानसमयेसर्वाणिभूतानिविजानत:पुरुषस्यात्मैवाभूततत्रसमये एकत्वम् जातिव्यक्तयोरिवविभागानर्हसम्बन्धविशेषमनुपश्यत:कोमोह:क:शोक इति सप्तममन्त्रार्थ: । य: सर्वभूतान्तरात्मभूतंब्रह्म पश्यति स तादृशब्रह्मदर्शीशुक्लमकायमित्यादिरूपंब्रह्मप्राप्नोति । कविर्मनीषीपरिभू:स्वयंभूश्चभवति । यथार्थरूपेण च सर्ववस्तुसदागृह्णातीतिअष्टमन्त्रार्थ: । येऽविद्यांविद्यारहितंकर्ममात्रमुपासतेतेऽतिगहनमज्ञानंविशन्तिततोऽपिअधिकतरमज्ञानंतेविशन्ति ये कर्मत्यक्त्वाविद्यायामेवरता: । इति नवममन्त्रार्थ: । केवलकर्मत: केवलज्ञानतश्चभिन्नंज्ञानकर्मसमुच्चयरूपमोक्षसाधनमितिदशममन्त्रार्थ: । ज्ञानकर्मस-

मुच्चयरूपंमोक्षसाधनमितिएकादशमन्त्रार्थः । द्वादशेमन्त्रोअसंभूतिज्ञानंसंभूतिःकर्म तयोःकेवलयोरुपासनस्यनिन्दाद्वादशमन्त्रेक्रियते । त्रयोदशेमन्त्रे ज्ञानकर्मणोःपृथक्पृथक्फलंदर्शितम् । चतुर्दशे मन्त्रे संभूतिःसमाधिरूपाब्रह्मोपासना, विनाशेहिंसास्तेयादिनिवृत्तितयोःपृथक्पृथक्फलंदर्शितम् । पञ्चदशेमन्त्रे सत्यस्यपरमात्मनोजीवस्य च मुखंद्वारंमनःहे पूषन् त्वपावृणुसत्यधर्मरूपपरमात्मप्राप्तयेतत्दृष्टये चेति अर्थः । हिरण्मयेनपात्रेणशब्दादिरूपेणविषयेणेत्यर्थः । हे पूषन् आश्रितपोषणस्वभाव, एकोद्वितीयऋषिः अतीन्द्रियार्थद्रष्टा । यमसर्वान्तर्यामिन् । सूर्यस्वाश्रितानांबुद्धेःसुष्ठुप्रेरक,प्राजापत्यप्रजापते स्वार्थेष्यञ् । व्यूहरश्मीन् समूहतेजःसौम्यम् । यत्तेकल्याणतमंरूपंतत्तेपश्यामियोऽसौपुरुषः सोऽहमस्मि अविभागंगतः इति षोडशमन्त्रार्थः । वायुर्जीवःअनिलम् निलयरहितःअमृतश्च इदं शरीरन्तुभस्मान्तम् । हे क्रतो ? क्रत्वाराध्यविष्णो ? मां स्मर अनुग्रहार्थम् । मम कृतंकर्मत्वदाराधनरूपंस्मरेति सप्तदशमन्त्रार्थः । हे अग्नेपरमेश्वररायेत्वत्प्राप्तिरूपायधनायअस्मन्सुपथाऽर्चिरादिमार्गेणनय । हे देव? आत्मा कं विश्वानिसर्वाणिवयुनानिउपायान् विद्वान् जानन् अस्माकं जुहुराणंकुटिलमेनःपापं युयोधि वियोजय भूयिष्ठांते नम उक्तिंविधेम इति अष्टादशमन्त्रार्थः ।

एवं केनकठप्रश्नमुण्डकमाण्डूक्यतैत्तिरीयैतरेयोपनिषत्सु श्रीराम एव परं ब्रह्म मन्त्रराजःषडक्षरोमहामन्त्रोज्ञानकर्मसमुच्चयोमुक्तिसाधनमित्येवआनन्दभाष्येषुतत्तदुपनिषदांदर्शितम् । त्रिविधाश्चोपासनास्तत्तत्कामफलप्रदाः, कामनानामभावेब्रह्मप्राप्तिफलादर्शिताः । देशिकपरिचर्यायांश्रीरामानन्दसम्प्रदायस्य एकचत्वारिंशत्प्रमुखाअन्येचापिलोकविदिताआचार्याःसंप्रदर्शिताः, तेषांकृतिकालादिकञ्चप्रदर्शितम् । तेषु श्रीतुलसीदासोविशेषरूपेणदृष्टिपथंसांप्रतमारोहति । यतस्तस्यकृतिर्मानसंनामअधुनासर्वस्यजगत उपकरोति । इदं च पुस्तकं न केवलं श्रीरामानन्दाचार्यानुयायिनामेवकेवलंमान्यं मार्गदर्शकञ्च अपि तु सर्वेषांदर्शनकर्तृणांसम्प्रदायानां च मान्यम् । एतत्पुस्तकनिदर्शितमार्ग एव च जगति जनानांक्षेमकारकउद्धारकश्च । ब्रह्मसूत्राणांश्रीवैष्णवाचार्यविरचितभाष्यमपि श्रीरामानन्दाचार्यविरचितमानन्दभाष्यमेवानुकरोतीति न तस्यपुनःपृथक् समीक्षणापेक्षा । वेदरहस्ये च श्रीराघवानन्दाचार्यदण्डिप्रणीते १५९ ऋङ्मन्त्राःश्रीरामचरितवर्णनपरतयाव्याख्याता इति महत्कौशलम् । छान्दोग्योपनिषद्भाष्येबृहदारण्यकोपनिषद्भाष्ये च श्रीमद्रामानन्दाचार्यैर्नानाविधाउपासनाःज्ञानकर्मसमुच्चयश्चमोक्षसाधनतयाप्रदर्शितः । श्रीरामस्यपरब्रह्मणःस्वरूपञ्चमन्त्रव्याख्यामुखेनदर्शितम् । तथैवश्वेताश्वतरोपनिषदानन्दभाष्येशिवरुद्रादीनांपरब्रह्मश्रीरामेसमन्वयंविधायतस्यैवभक्त्यासमाराधनीयत्वंसमर्थितम् । वैष्णवश्रीदेवदासविदुषाहिन्दीभाषायांसंगृहीतंश्रीरामानन्दाचार्यजीवनचरितञ्चलोकानांजीवनस्यादर्शभूतम् । यत्रसदाचाराउपासनाभक्तयोर्विविधाश्चमोक्षसाधकाःसिद्धिमार्गाबहूनि च दर्शनसाराणिप्रदर्शितानि । श्रीरामानन्ददर्शनस्यप्रचारकंप्रसाधकञ्च जगद्गुरुश्रीरामानन्दाचार्यपीठ नामकंमासिकंपत्रमपि आचार्यपीठ-श्रीकोसलेन्द्रमठ कर्णावती (अहमदाबाद) नगरतःप्रचलति । तदपितद्धितायेतिविदुषोबोधयन्विरमामि । ॥